# shrIrAmAShTottarashatanAmAvaliH 6

# શ્રીરામાષ્ટોત્તરશતનામાવલિઃ ૬

## Document Information

Text title : rAmAShTottarashatanAmAvaliH 6

File name : rAmAShTottarashatanAmAvaliH6.itx

Category : raama, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીરામાષ્ટોત્તરશતનામાવલિઃ ૬

ૐ સર્વદેવસમારાધ્યપદપઙ્કજશોભિતાય નમઃ ।
વેદમૌલિસમામ્નાતપરમાનન્દવૈભવાય નમઃ ।
મુનિવૃન્દસમારાધ્યદિવ્યમઙ્ગલવિગ્રહાય નમઃ ।
દિવ્યગન્ધરસાઘ્રાઢ્યપરલોકવિરાજિતાય નમઃ ।
દિવ્યમોહનરૂપાઢ્યનિત્યસૂરિનિષેવિતાય નમઃ ।
મહામણિવિચિત્રાઙ્ગમણ્ટપાન્તર્વિરાજિતાય નમઃ ।
શ્રીભૂમિનીલાસંસેવ્યપાદપીઠલસત્પદાય નમઃ ।
શઙ્ખચક્રગદાપદ્મસંશોભિતકરામ્બુજાય નમઃ ।
લોકરક્ષણસમ્પ્રાપ્તવિવિધાકૃતિપૂજિતાય નમઃ ।
પૌલસ્ત્યવિક્રમપ્લુષ્ટવિધિમુખ્યસુરસ્તુતાય નમઃ ॥ ૧૦

દેવાભયપ્રદાનાર્થપરસૌલભ્યસાગરાય નમઃ ।
વાનરીકૃતવિદ્યાદિદેવનાયકસન્નુતાય નમઃ ।
ચક્રવર્તિગૃહાવાસરોચનાયુતચેતનાય નમઃ ।
કૌસલ્યાભક્તિપૂર્ત્યર્થતદ્ગર્ભવસતિપ્રિયાય નમઃ ।
ઋષ્યશ ૃઙ્ગમુનિશ્રેષ્ઠકારિતેષ્ટિફલોદ્ગમાય નમઃ ।
યજ્ઞપાવકસઞ્જાતપાયસાન્નસ્વરૂપધૃતે નમઃ ।
તત્પ્રાશનસુસંહૃષ્ટકૌસલ્યાગર્ભસમ્ભવાય નમઃ ।
ચૈત્રશુદ્ધનવમ્યાઢ્યપુનર્વસુવિનિર્ગતાય નમઃ ।
રામાજનસમાહ્લાદશઙ્ખચક્રાદિશોભિતાય નમઃ ।
રામનામવિરાજચ્છ્રીભક્તસઙ્ઘકૃતાર્હણાય નમઃ ॥ ૨૦

ભરતાદિમહોદારભ્રાતૃમધ્યવિરાજિતાય નમઃ ।
વયસ્યકેલિસઞ્જાતસુન્દરસ્વેદભૂષિતાય નમઃ ।
કસ્તૂરીતિલકોદ્ભાસિચૂર્ણકુન્તલરાજિમતે નમઃ ।
રાકાચન્દ્રનિભશ્રીમદ્વદનામ્બુજશોભિતાય નમઃ ।
વિકાસોન્મુખપદ્મશ્રીમન્દહાસાતિસુન્દરાય નમઃ ।

પ્રિયભાષણસંસક્તભક્તસઙ્ખ્યવિરાજિતાય નમઃ ।
રાજલક્ષણમાધુર્યસન્તોષિતમહીપતયે નમઃ ।
વિશ્વામિત્રાનુગશ્રીમલ્લક્ષ્મણાનુચરાદૃતાય નમઃ ।
તાટકાખ્યમહામૃત્યુભયવિધ્વંસકારકાય નમઃ ।
યજ્ઞપ્રત્યૂહકૃદ્રક્ષોવિક્ષોભણકૃતાભયાય નમઃ ॥ ૩૦

કુશિકાત્મજસમ્પ્રોક્તતુષારાદ્રિસુતાકથાય નમઃ ।
ગૌતમાખ્યમુનિશ્રેષ્ઠવનિતાપાપભઞ્જકાય નમઃ ।
ચન્દ્રશેખરકોદણ્ડભઞ્જનાત્તમહોન્નતયે નમઃ ।
જાનકીહસ્તસન્દત્તહારશોભિભુજાન્તરાય નમઃ ।
વધુયુક્તસહોદર્યવન્દિતાઙ્ઘ્રિસરોરુહાય નમઃ ।
ભાર્ગવાસ્ત્રગૃહીતશ્રીસન્તોષિતમહીપતયે નમઃ ।
વસિષ્ઠાદિમુનિપ્રીતજનનીજનપૂજિતાય નમઃ ।
જાનકીમાનસોલ્લાસકુમુદોદ્ભાસિચન્દ્રમસે નમઃ ।
જ્ઞાનવૃદ્ધવયોવૃદ્ધશીલવૃદ્ધસુસમ્મતાય નમઃ ।
માધુર્યાઢ્યમહૌદાર્યગુણલુબ્ધમહીપ્રિયાય નમઃ ॥ ૪૦

મહાગજસમારૂઢદર્શનેચ્છુજનાવૃતાય નમઃ ।
કૈકેયીવાક્યસન્તપ્તમહીપતિસમીપગાય નમઃ ।
અનાયાસગૃહીતસ્વવનવાસવિરાજિતાય નમઃ ।
મુનિરક્ષાત્વરાત્યક્તજનન્યાદિજનાર્થનાય નમઃ ।
સીતાસૌમિત્રિસંસેવ્યરથોત્તમવિરાજિતાય નમઃ ।
ગુહાનીતવટક્ષીરધૃતકેશજટાતતયે નમઃ ।
ગઙ્ગાતીરપરિત્યક્તખિન્નસારથિમિત્રવતે નમઃ ।
ભરદ્વાજમુનિપ્રોક્તચિત્રકૂટનિવાસકૃતે નમઃ ।
મૃતતાતસુસંસ્કારક્ષણાગતસહોદરાય નમઃ ।
બહુન્યાયસમાખ્યાનવિતીર્ણનિજપાદુકાય નમઃ ॥ ૫૦

વસિષ્ઠાદિમહીદેવદેવનાથાદિપૂજિતાય નમઃ ।
ખરભીતમુનિવ્રાતસૂચિતાત્મવ્યવસ્થિતયે નમઃ ।
શરભઙ્ગમહાયોગિનિત્યલોકપ્રદાયકાય નમઃ ।
અગસ્ત્યાદિમહામૌનિપૂજિતાઙ્ઘ્રિસરોરુહાય નમઃ ।
રાક્ષસાર્તમુનિશ્રેષ્ઠસંરક્ષણકૃતાભયાય નમઃ ।
વિરાધવધસન્તુષ્ટદેહિવૃન્દનિષેવિતાય નમઃ ।

ગૃધ્રરાજમહાપ્રીતિસ્થિતપઞ્ચવટીતટાય નમઃ ।
કામાર્તરાક્ષસીકર્ણનાસિકાચ્છેદનાદરાય નમઃ ।
ખરકોપવિનિષ્ક્રાન્તખરમુખ્યનિષૂદનાય નમઃ ।
માયામૃગતનુચ્છન્નમારીચતનુદારણાય નમઃ ॥ ૬૦

સીતાવચનસઙ્ખિન્નસૌમિત્રિભૃશકોપનાય નમઃ ।
શુન્યોટજસમાલોકવ્યથિતાશયભિન્નધિયે નમઃ ।
વૃત્તબોધિજટાય્વર્થદત્તલોકમહોન્નતયે નમઃ ।
મુક્તાશાપકબન્ધોક્તજાનકીપ્રાપ્તિનિશ્ચયાય નમઃ ।
શબરીચિરકાલાપ્તતદ્ભુક્તફલસંસ્પૃહાય નમઃ ।
ભિક્ષુરૂપપ્રતિચ્છન્નહનુમદ્વચનાદરાય નમઃ ।
સ્નિગ્ધસુગ્રીવવિસ્રમ્ભદત્તવીર્યપરીક્ષણાય નમઃ ।
વિદ્ધવાલિસમાખ્યાતશાસ્ત્રસારવિનિર્ણયાય નમઃ ।
વર્ષર્તુસર્વસમયગિરિપ્રસ્રવણસ્થિતાય નમઃ ।
વિસ્મૃતાખિલસુગ્રીવપ્રેષિતાત્મસહોદરાય નમઃ ॥ ૭૦

નતસુગ્રીવસન્દિષ્ટહનુમદ્દત્તભૂષણાય નમઃ ।
પ્રાપ્તચૂડામણિપ્રેક્ષાસંસ્મારિતગુરુત્રયાય નમઃ ।
વાયુસૂનુવિતીર્ણસ્વશરીરાલિઙ્ગનોજ્જ્વલાય નમઃ ।
કપિસૈન્યમહોત્સાહપ્રાપ્તનીરધિસત્તટાય નમઃ ।
વિભીષણપરિત્રાણપ્રથિતાત્મમહાવ્રતાય નમઃ ।
મહોદધિમહાવેગજાતક્રોધાતિભીષણાય નમઃ ।
શરાર્તવાર્ધિરત્નૌઘપૂજિતાબ્જપદદ્વયાય નમઃ ।
કાર્યપ્રકત્યૂહવિધ્વંસસમ્પૂજિતમહેશ્વરાય નમઃ ।
મહાસેતુમહાદેવવિધિમુખ્યસુરાર્ચિતાય નમઃ ।
વાલિસૂનુદશગ્રીવસમાશ્રાવિતતદ્ધિતાય નમઃ ॥ ૮૦

સમાગતઘટીકર્ણમુખરાક્ષસસૂદનાય નમઃ ।
દશગ્રીવશિરોરાજત્કિરીટાગ્ર્યવિભેદકાય નમઃ
ઇન્દ્રજિદ્વધકાર્યાપ્તસુમિત્રાસુતવન્દિતાય નમઃ ।
રાક્ષસાધિપવિદ્ધ્વંસદેવસઙ્ઘકૃતસ્તુતયે નમઃ ।
વહ્નિપ્રવેશદીપ્તાઙ્ગજાનકીપ્રીતમાનસાય નમઃ ।
ચક્રવર્તિમહેશાનવિધિમુરવ્યસ્તુતોન્નતયે નમઃ ।
અભિષિક્તસમાયાતવિભીષણકૃતસ્તુતાય નમઃ ।

નિજપાદાબ્જસંસક્તરક્ષોવૈભવશંસનાય નમઃ ।
યૂથનાયકતત્પત્નીવિભીષણપરીવૃતાય નમઃ ।
પુષ્પકાગતિસુપ્રીતભરદ્વાજકૃતાર્ચનાય નમઃ ॥ ૯૦

ભરતાનન્દસન્દોહવર્ધનાદૃતમારુતયે નમઃ ।
મહાસામ્રાજ્યલબ્ધશ્રીનન્દિતાખિલચેતનાય નમઃ ।
કાશીક્ષેત્રમહેશાનચિન્તિતાત્મમહામનવે નમઃ ।
મૃતૌ તદ્દત્તતન્મન્ત્રલબ્ધમુક્તિપદસ્તુતાય નમઃ ।
શ્રીરામતાપિનીપ્રોક્તવિશ્રુતાનન્તવૈભવાય નમઃ ।
મકારાક્ષરસઞ્જાતશિવાંશહનુમત્પ્રિયાય નમઃ ।
નિજચારિત્રસમ્પૂતવાલ્મીકિવરદાયકાય નમઃ ।
નામવૈભવલેશાંશવિધ્વંસિતવિપત્તતયે નમઃ ।
ચેતનાસેચનાનન્દનિજવૈભવભૂષિતાય નમઃ ।
અવિશેષવિતીર્ણાર્તરક્ષણોત્થમહોન્નતયે નમઃ ॥ ૧૦૦

મહેશવિદિતાનન્દનિજવૈભવભૂષિતાય નમઃ ।
લક્ષ્મીવિષ્વંશસમ્પૂર્ણસીતારામશરીરવતે નમઃ ।
વિષ્ણુશભુમહામન્ત્રસારાક્ષરસુનામવતે નમઃ ।
મિત્રભાવસમાયાતભક્તરક્ષૈકદીક્ષિતાય નમઃ ।
સકૃત્પ્રપન્નજનતાસંરક્ષણધુરન્ધરાય નમઃ ।
શ્રિતચિત્તપરાનન્દદાયિમઙ્ગલવિગ્રહાય નમઃ ।
ધર્માર્થકામમોક્ષાખ્યફલસર્વાર્થદાયકાય નમઃ ।
ભક્તેષ્ટફલદાનોત્કકરુણાસાન્દ્રચેતસે નમઃ ॥ ૧૦૮

ઇતિ શ્રીરામાષ્ટોત્તરશતનામાવલિઃ ૬ સમાપ્તા ।

Proofread by PSA Easwaran

*shrIrAmAShTottarashatanAmAvaliH 6*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*